# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-२ (SEM-3)** | **प्रश्नपत्र-६** | **गुणा: - ७०** |
| **विषय:- साहित्यम्** | **CC-236** | **समय: - ०३ त: ०६** |
| **दिनाङ्क: - ३०/११/२०१६** | **सन्दर्भग्रन्थ: - वेणीसंहारनाटकम्** | |

**॥ प्रथमान्विति: ॥**

**प्र-१ निम्नलिखितश्लोकेषु द्वयो: सप्रसङ्गं व्याख्या विधेया । ०८**

१. निर्वाणवैरदहना: प्रशमादरीणां नन्दन्तु पाण्डुतनया: सह माधवेन ।
रक्तप्रसाधितभुव: क्षतविग्रहाश्च स्वस्था भवन्तु कुरुराजसुता: सभृत्या: ॥

२. तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां वने व्याधै: सार्द्धं सुचिरमुषितं वल्कलधरै: ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं गुरु: खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥

३. मथ्नामि कौरवशतं समरे न कोपाद् दु:शासनस्य रुधिरं न पिबाम्युरस्व: ।
सञ्चूर्णयामि गदया न सुयोधनोरु सन्धिं करोतु भवतां नृपति: पणेन ॥

**प्र-२ वेणीसंहाररचयितु: जीवनवृत्तान्तं लिखत । ०८**

**अथवा**

**प्रथमाङ्कस्य सुरगिरया सारांशं लिखत ।**

**प्र-३ द्वयो: टिप्पणी लेख्या । ०४**

१. भट्टनारायणस्य गोत्रनाम किम्?

२. के पञ्चग्रामा: याचिता:?

३. स्वस्था भवन्ति मयि जीवति धार्तराष्ट्रा: - अस्य भावार्थ: ।

४. चेटीभीमसेनयो: प्रसङ्ग: ।

**प्र-४ पञ्चानां लघूत्तराणि लिखत । ०५**

१. सुयोधनस्य मातु: नाम किम्?

२. माद्रीपुत्रौ कौ स्त:?

३. मृगराजोपाधिधारक: क:?

४. किरीटी - इत्यस्य कोऽर्थ:?

५. विरूढम् - इत्यस्य कोऽर्थ:?

६. वेणीसंहारनाटकस्य कति अङ्का:?

७. मङ्गलाचरणे किं वृत्तं विद्यते?

**॥ द्वितीयान्विति: ॥**

**प्र-५ द्वयो: ससन्दर्भं व्याख्या विधेया । ०८**

१. प्रायेणैव हि दृश्यन्ते स्वप्ना: कामं शुभाशुभा: ।
शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥

२. ग्रहाणां चरितं स्वप्नोऽनिमित्तान्युपयाचितम् ।
फलन्ति काकतालीयं तेभ्य: प्राज्ञा न बिभ्यति ॥

३. धर्मात्मजं प्रति यमौ च कथैव नास्ति मध्ये वृकोदरकिरीटभृतोर्बलेन ।
एकोऽपि विस्फुरितमण्डलचापचक्रं क: सिन्धुराजमभिषेणयितुं समर्थ: ॥

**प्र-६ द्वितीयाङ्कस्य सारं लिखत ।** **०८**

**अथवा**

**वेणीसंहारनाटकस्य शीर्षकविषये सविस्तरं लिखत ।**

**प्र-७ दु:स्वप्नं श्रुत्वा दुर्योधनस्य किं कथनम् इति लिखत ।** **०२**

**अथवा**

**भग्नं भीमेन भवतो मरुता रथकेतनम् - अस्य भावार्थ: क:?**

**प्र-८ निम्नेषु द्वयो: एकवाक्येन उत्तरं लिखत ।** **०२**

१. राधेय: - इति कस्य नाम?
२. वेणीसंहारे प्रधान रस: क:?
३. दुर्योधनस्य भार्याया: नाम किम्?
४. जयद्रथस्य भार्याया: नाम किम्?

**॥ तृतीयान्विति: ॥**

**प्र-९ निम्नेषु श्लोकेषु द्वयस्य सप्रसङ्गं व्याख्या विधेया ।** **०८**

१. आजन्मनो न वितथं भवता किलोक्तं न द्वेक्षि यज्जनमतस्त्वमजातशत्रु: ।
ताते गुरौ द्विजवरे ममभाग्यदोषात् सर्वं तदेकपद एव कथं निरस्तम् ॥

२. सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम् ।
दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम् ।

३. कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधै: ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना मयमहमसृङ्मेंदो मांसै: करोमि दिशां बलिम् ॥

**प्र-१० कर्णाश्वत्थाम्नो: चरित्रचित्रणं लिखत ।** **०८**

**अथवा**

**तृतीयाङ्कस्य सारांशं लिखत ।**

**प्र-११ द्वयो: टिप्पण्यौ लेखनीयौ ।** **०४**

१. भीम: ।
२. सूत: ।
३. कृपाचार्य: ।
४. दुर्योधन: ।

**प्र-१२ पञ्चप्रश्ना: एकेन वाक्येन समाधेया: ।** **०५**

१. द्रुपदपुत्रस्य नाम किम्?
२. अजातशत्रु: कस्य कृते शब्द:?
३. वत्सशब्दस्य कोऽर्थ:?
४. अङ्गराज: क:?
५. कथमन्ये करिष्यन्ति पुत्रेभ्योऽपुत्रिण: स्पृहाम् - अस्य भावार्थ: ।
६. तृतीयाङ्के कति श्लोका: सन्ति?
७. क्रुरेऽपि तन्मयि मुधा तवपक्षपात: - इति कस्योक्ति:?